पात्रं तदुपरि न्यस्तेत्तान् वैष्णवमेव वा ।
तत्रोपवेश्य स स्थाप्य देवं विप्रदत्तचन्दनैः ।
आलिप्य शुभ्रं वसनं दद्याच्छत्रञ्च पादुके ।
वासुदेवायेति शिरः श्रीधरायेति वै मुखम् ।
कण्ठायेति च कण्ठं वै वक्षः श्रीपतये इति ।
शङ्खास्त्रधारिणे बाहू कक्षे च व्यापकाय वै ।
कवीशायेदरं मेढ्रं त्रैलोक्यजननाय च ।
अघनं चार्च्चयेद्विद्वान् सर्व्वाधिपतये इति ।
सर्व्वात्मने इति पदावेवमङ्गानि पूजयेत् ।
शङ्खचक्रगदापद्मशार्ङ्गशरविभूषितम् ।
गृहाणार्घ्यं मया दत्तं शार्ङ्गपाणे ! नमोऽस्तु ते ।
इत्यर्घ्यं पूर्व्ववत् कृत्वा धूपदीपौ समर्प्य च ।
घृतपक्वप्रधानानि नैवेद्यानि निवेदयेत् ।
ताम्बूलादीनि दत्त्वाथ कृत्वा जागरणं निशि ।
प्रातःस्नात्वार्च्चयित्वेशं पुष्पाञ्जलिमथार्पयेत् ।
नमस्ते अस्तु गोविन्द बुध श्रवणसंज्ञक ।
अघौघं संक्षयं कृत्वा सर्व्वसौख्यप्रदो भव ।
इति प्रार्थ्य ततः सर्व्वं दत्त्वा चार्घ्यं प्रतोष्य
च ।
भक्त्या विप्रान् भोजयित्वा सुखं पारणमाचरेत् ।
भाद्रे मासि बुधस्याह्नि यदि स्याद्विजयाव्रतम् ।
तदा सर्व्वव्रतेभ्योऽस्य माहात्म्यमतिरिच्यते ।"
इति श्रीहरिभक्तिविलासे १३ विलासः ।
(सहदेवपत्नी । यथा, महाभारते ।१।९५।८०।
"सहदेवोऽपि माद्रीमेव स्वयंवरे विजयां नामो-
पयेमे मद्रराजस्य द्युतिमतो दुहितरं तस्यां
पुत्त्रमजनयत् सुहोत्रं नाम ।"*।
पुरुवंशीयभूमन्योः पत्नी । यथा, तत्रैव ।१।
९५।२२।
"भूमन्युः खलु दाशार्हीमुपयेमे विजयां नाम
तस्यामस्य जज्ञे सुहोत्रः ।")
विजयासप्तमी, (विजयाख्या सप्तमी ।) रविवारे
शुक्लपक्षीया सप्तमी । यथा,—
"शुक्लपक्षस्य सप्तम्यां सूर्य्यवारो यदा भवेत् ।
सप्तमी विजया नाम तत्र दत्तं महाफलम् ।"
इति तिथ्यादितत्त्वम् । * ।
अथ विजयोत्सवविधिः ।
"रथमारोप्य देवेशं सर्व्वालङ्कारशोभितम् ।
सावित्रसधनुर्ब्बाणपाणिं नक्तञ्चरान्तकम् ।
स्वलीलया जगत्त्रातुमाविर्भूतं रघूद्वहम् ।
राजोपचारैः श्रीरामं शमीकल्पतलं नयेत् ।
सीताकान्तं शमीयुक्तं भक्तानामभयङ्करम् ।
अर्च्चयित्वा शमीरत्नमर्च्चयेद्विजयाप्तये ।"
तत्र मन्त्रः ।
"शमी शमयते पापं शमी लोहितकण्टका ।
धरित्र्यर्ज्जुनबाणानां रामस्य प्रियवादिनी ।
करिष्यमाणा या यात्रा यथाकालं सुखं मया ।
तत्र निर्व्विघ्नकर्त्री त्वं भव श्रीरामपूजिता ।
गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदम् ।
गीतवादित्रनिर्घोषैस्ततो देवं गृहं नयेत् ।
केचिद्देवैस्तत्र भावं केचिद्भावञ्च वानरैः ।
केचिद्रक्षःसुखैर्भावं कौशलेन्द्रस्य तुष्टये ।
निर्ज्जिता राक्षसा देवा वैरिणो जगतीतले ।
रामराज्यं रामराज्यं रामराज्यमिति ब्रुवन् ।
आनीय स्थापयेद्देवं निजसिंहासने सुखम् ।
ततो नीराज्य देवेशं प्रणमेद्दण्डवद्भुवि ।
महाप्रसादवस्त्रादि धारयेद्वैष्णवैः सह ।
इति श्रीविष्णुधर्म्मोक्तानुसारेण यथेक्षयम् ।
विधिः श्रीरामविजयोत्सवस्योत्सवकृत् सताम् ।
सीता दृष्टेति हनुमद्वाक्यं श्रुत्वाकरोत्प्रभुः ।
विजयं वानरैः सार्द्धं वासरेऽस्मिन् शमी-
तलात् ।"
इति श्रीहरिभक्तिविलासे १५ विलासः ।
विजयिनं, त्रि, विजितम् । इत्यमरटीकायां राय-
मुकुटः ।
विजयी, [न्] त्रि, (विशेषेण जेतुं शीलमस्य ।
वि+जि+"जिदृक्षिविश्रीति ।" ३ । २ ।१५७।
इति इनिः ।) जययुक्तः । यथा,—
"वज्रपञ्जरनामेदं यो रामकवचं पठेत् ।
स चिरायुः सुखी पुत्त्री विजयी विनयी
भवेत् ।"
इति तन्त्रसारः ।
(पुं, अर्ज्जुनः । यथा,—
"अर्ज्जुनः फाल्गुनो जिष्णुः किरीटी श्वेतवा-
हनः ।
बीभत्सुर्व्विजयी कृष्णः सव्यसाची धनञ्जयः ।
एतान्यर्ज्जुननामानि प्रातरुत्थाय यः पठेत् ।
उद्यतेष्वपि शस्त्रेषु हन्ता तस्य न विद्यते ।"
इति सर्व्वजनप्रसिद्धम् ।)
विजयोत्सवः, पुं, (विजयायास्तदुत्सवः ।) आश्विन-
शुक्लदशमीविहितभगवदुत्सवविशेषः । यथा,
"आश्विनस्य सिते पक्षे दशम्यां विजयोत्सवः ।
कार्य्यो वैष्णवैः सार्द्धं सर्व्वत्र विजयार्थिना ।"
अथ विजयोत्सवविधिः ।
"रथमारोप्य देवेशं सर्व्वालङ्कारशोभितम् ।
सावित्रसधनुर्ब्बाणपाणिं नक्तञ्चरान्तकम् ।
स्वलीलया जगत्त्रातुमाविर्भूतं रघूद्वहम् ।
राजोपचारैः श्रीरामं शमीकल्पतलं नयेत् ।
सीताकान्तं शमीयुक्तं भक्तानामभयङ्करम् ।
अर्च्चयित्वा शमीरत्नमर्च्चयेद्विजयाप्तये ।"
तत्र मन्त्रः ।
"शमी शमयते पापं शमी लोहितकण्टका ।
धरित्र्यर्ज्जुनबाणानां रामस्य प्रियवादिनी ।
करिष्यमाणा या यात्रा यथाकालं सुखं मया ।
तत्र निर्व्विघ्नकर्त्री त्वं भव श्रीरामपूजिता ।"
इति ।
"गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदम् ।
गीतवादित्रनिर्घोषैस्ततो देवं गृहं नयेत् ।
केचिद्देवैस्तत्र भावं केचित् भावञ्च वानरैः ।
केचिद्रक्षःसुखैर्भावं कौशलेन्द्रस्य तुष्टये ।
निर्ज्जिता राक्षसा देवा वैरिणो जगतीतले ।
रामराज्यं रामराज्यं रामराज्यमिति ब्रुवन् ।
आनीय स्थापयेद्देवं निजसिंहासने सुखम् ।
ततो नीराज्य देवेशं प्रणमेद्दण्डवत् भुवि ।
महाप्रसादवस्त्रादि धारयेत् वैष्णवैः सह ।*।
इति श्रीविष्णुधर्म्मोक्तानुसारेण यथेक्षयम् ।
विधिः श्रीरामविजयोत्सवस्योत्सवकृत् सताम् ।
सीता दृष्टेति हनुमद्वाक्यं श्रुत्वाकरोत् प्रभुः ।
विजयं वानरैः सार्द्धं वासरेऽस्मिन् शमीतलात् ।"
इति श्रीहरिभक्तिविलासे १५ विलासः ।
विजरः, त्रि, जरारहितः । विगता जरा यस्येति
बहुव्रीहिसमासनिष्पन्नः । (यथा, कथासरित्-
सागरे । ४१ । ११ ।
"यः सर्व्वौषधियुक्तिज्ञश्चक्रे सिद्धरसायनः ।
आत्मानं तस्य राजानं विजरं चिरजीवितम् ।")
विजलं, त्रि, विजिलम् । इति हेमचन्द्रः । (विगतं
जलं यस्मात् ।) निर्जलञ्च । (यथा, बृहत्-
संहितायाम् । १९ । २० ।
"नष्टर्कचन्द्रकिरणातिरजोऽवनद्धा
तोयाशयाश्च विजलाः सरितोऽपि तन्व्यः ।")
विजल्पः, पुं, (विशेषेण जल्पनमिति । वि+जल्प+
घञ् ।) वाक्यविशेषः । यथा,—
"अक्षयासूयया गूढ़मानमुद्रान्तरालया ।
अघद्विषि कटाक्षोक्तिर्विजल्पो विदुषां मतः ।"
इत्युज्ज्वलनीलमणिः ।
विजातः, त्रि, (विरुद्धं जातं जन्म यस्य ।) विजन्मा ।
इति लोकप्रसिद्धः ।
विजाता, स्त्री, (विशेषेण जातः पुत्त्रो यस्याः ।)
जातापत्या । यथा,—
"विजाता च प्रजाता च जातापत्या प्रसू-
तिका ।"
इति हेमचन्द्रः ।
विजातीयः, त्रि, (विभिन्नां जातिमर्हतीति ।
विजाति+छः ।) विभिन्नधर्म्माक्रान्तः । यथा,
"प्रायश्चित्ताद्विजातीयात् वाक्कृपापविना-
शनम् ।"
इति प्रायश्चित्ततत्त्वम् ।
(यथा च साहित्यदर्पणे ७ परिच्छेदे ।
"एवं पददोषसजातीया वाक्ये दोषा उक्ताः
सम्प्रति तद्विजातीया उच्यन्ते ।") विशेष-
जातिविशिष्टः । यथा,—
"प्रवाहो नादिमानेव न विजात्येकशक्तिमान्
तत्त्वे यत्नवता भाव्यमन्वयव्यतिरेकयोः ।"
एव कार्य्यकारणप्रवाहो नादिमान् अनादिः ।
विजातीयेषु तृणादिषु एकशक्तिमान् न प्रवाहः ।
अन्वयव्यतिरेकयोस्तत्त्वे नियतत्वे नियतत्व-
निर्व्वाहे यत्नवता भाव्यं यत्नः करणीयः वैजात्य-
मिति भावः । वह्निसामान्यं प्रति विजाती-
योष्णस्पर्शवत्तेज एव कारणम् । इति हरि-
दासीयकुसुमाञ्जलिटीका ।
विजिगीषः, त्रि, (विजिगीषा अस्यास्तीति । अर्श-
आदित्वादच् ।) जयेच्छुः । इति सिद्धान्त-
कौमुदी ।
विजिगीषा, स्त्री, (विजेतुमिच्छा । वि+जि+
सन्+अः । स्त्रियां टाप् ।) खोदरपूरणाप्रसि-
निमित्तकनिन्दाद्यागेच्छा । इत्यमरटीकायां